विषम्। ईश्वराणां वचः सत्यं तथैवाऽऽचरितं क्वचित्॥ तेषां यत्स्ववचो युक्तं बुद्धिमांस्तत्समाचरेत्॥ कुशलाचरितेनैषामिह स्वार्थो न विद्यते। विपर्ययेण वाऽनर्थो निरहङ्कारिणां प्रभो॥ किमुताखिलसत्त्वानां तिर्य्यङ्मर्त्य दिवौकसाम्॥ ईशितुश्चेशितव्यानां कुशलाकुशलान्वयः॥ यत्पादपङ्कजपरागनिषेवतृप्ता योगप्रभावविधुताखिलकर्मबन्धाः॥स्वैरं चरन्ति मुनयोऽपि न नह्यमानास्तस्येच्छयात्तवपुषः कुत एव बंधः॥गोपीनां तत्पतीनां च सर्वेषामेव देहिनाम्। योऽन्तश्चरति सोऽध्यक्षः क्रीडनेनेह देहभाक्,,॥तथा भा०स्कं०११श्लो० १ श्री भगवानुवाच॥ "बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः॥ गुणस्य मायामूलत्वान्न मे मोक्षो न बन्धनम्" इस से यह सिद्ध हुआ कि प्राकृतवासनारहित स्वतन्त्र पूर्णपुरुषोत्तम के चरित मे पाप पुण्य की आशंका कर के आक्षेप करना सर्वथा अज्ञानविजृम्भण है।

(ग) विहार लीला की अनुचितता की साधक तृतीय युक्ति यह रक्खी है कि स्वभक्त गोपीजन को निन्दित कार्य्य में नियुक्त करना न्याय नहीं॥ इसका प्रथम उत्तर तो यह है कि भगवान् ने गोपियों को

विहार के लिये नियोजन नहीं किया प्रत्युत "रजन्येषा घोररूपा' इत्यादि श्लोकों से गोपियों को समझाया परन्तु गोपियों की विहार की ही अति उत्कण्ठा देख के वरद्राट् भगवान ने उनके मनोरथ पूर्ण किये ॥ और दूसरा उत्तर यह है कि कोई रीति से प्रभु के संमुख होना निन्दित कर्म नहीं है प्रत्युत मोक्षजनक है जैसे श्री भा० "गोप्यः कामाद्भयात्कंसः" स्कं १० श्लोक ४५ अ० २ "युवांमां पुत्रभावेन ब्रह्मभावेन वाऽसकृत् ॥ चिन्तयन्तौकृतस्नेहौ यास्येथे मद्गतिं पराम्" ॥ स्क० १० अ० २९ श्लो० १३ श्री शुकउवाच ॥ "उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथा गतः ॥ द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः॥इत्यादि॥अर्थात् न तो गोपियोंको प्रभु नें नियुक्त ही किया और न प्रभु के साथ विहार निन्दित ही है इससे पूर्वोक्त आक्षेप असङ्गत है ॥ और गोपियों को साधारण गोपकन्या समझ के ऐसे प्रश्नों का उद्भव होता है परन्तु वस्तुतः गोपी साधारण गोपकन्या नहीं है किन्तु साक्षात् श्रुति हैं। और इन ने सगुण ब्रह्म पूर्णपुरुषोत्तम के संग विहार ही करने के लिये गोपीरूप ग्रहण किया है इस

से इन को श्रद्धानुरागपूर्वक भगवान् में अनुरक्त होना और उन पर पतिभाव कर के उन के संग विहार करना दूषण नहीं किन्तु भूषण है यह कथा सविस्तर बृहद्वामनपुराण के उत्तर खिल्य में है ॥

और नाना गोपी भगवच्छक्ति स्वरूपभी हैं॥जैसे ॥ आथर्वणवासुदेवोपनिषद् 'गोप्यो नाम' यहां से लेके 'चन्दनं गोपीचन्दनम्' यहां तक।

तथा श्री भा० स्क० १० "ताभिर्विधूतशोकाभिर्भगवानच्युतो वृतः। व्यरोचताधिकं तात पुरुषः शक्तिभिर्यथा॥

इस पर यह शंका नहीं करनी कि उन प्रकृति महदादि शक्तियों का मूर्त्तिमान् होना कैसे संभव है? क्यों कि जैसे शब्दों की तो मूर्ति नहीं होती है तथापि शब्दसमुदायस्वरूप वेदों का मूर्त्तिमान् होना श्री भागवत में कहा है जैसे "वेदा यथा मूर्तिधरास्त्रिपृष्ठे" और ब्रह्मा ने भी आत्मा प्रकृति महत्तत्व अहंकार काल स्वभाव कर्म औ प्रकृति को वत्सहरण के प्रकरण में मूर्तिमान् देखा जैसे भा० स्क० १० अ० १३ श्लोक ५१-५२-५३" आत्मादिस्तंबपर्यन्तैर्मूर्तिमद्भिश्चराचरैः॥ नृत्यगीताद्यनेकार्हैः पृथक्

पृथगुपासिता: ॥ अणिमाद्यैर्महिमभिरजाद्याभिर्विभूतिभि:।चतुर्विंशतिभिस्तत्त्वैः परीता महदादिभि:॥ कालस्वभावसंस्कारकामकर्मगुणादिभि: ॥ स्वमहिध्वस्तमहिभिर्मूर्तिमद्भिरुपासिता:"।।तथा अक्रूर ने यमुना में समस्त शक्तियों से सेव्यमान भगवान् का दर्शन किया इत्यादि।

और नाना गोपी देवी हैं जिन ने केवल प्रभु की मधुर लीला ही के लिये गोपीस्वरूप ग्रहण किया है जैसे श्री भा० स्कं० १० अ० २३ "वसुदेवगृहे साक्षाद् भगवान् पुरुषः परः। जनिष्यते तत्प्रियार्थं सम्भवन्तु सुरस्त्रियः" ॥

इस से गोपीजन को साधारण गोपपत्नी समझ के जो यह आशंका की सो गोपी साधारण गोपपत्नी नहीं हैं किन्तु केवल विहारार्थ प्रगट भई श्रुति शक्ति तथा देवी हैं ॥

फलितार्थ यह हुआ कि न तो प्रभु ने विहार में उन को नियुक्त किया और न उनको मनोर्थ पूरण करना अनुचित ही भया क्योंकि भगवान् तो कल्पवृक्षवत् वरदराट् हैं और न ये गोपी साधारण गोप कन्यास्वरूप मानुषी ही हैं किन्तु प्रभु की ही दिव्य-

शक्ति श्रुति तथा देवी स्वरूप हैं॥

भगवान् के काल्प वृक्षवत् वरद होने में प्रमाण भा० स्कं० ६ "न तस्य कश्चित् दयितः सुहृत्तमो न च प्रियो द्वेष्य उपेक्ष्य एव च। तथापि भक्तान् भजते तथा यथा सुरद्रुमो यद्वदुपाश्रितोऽर्थदः"॥

(घ) विहार लीला की अनुचितता की साधक चतुर्थ युक्ति यह है कि जिन भगवान् ने गीता में अर्जुन से ऐसे कहा है कि "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। स यत्प्रमाणं कुरुते लोकस्तदनुवर्त्तते" तथा "मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ सर्वशः" उन्हीं भगवान् के परदाराऽभिमर्षणरूप आचरण लोक को दुष्प्रवृत्ति के जनक होंगे इस से ऐसे कर्मों का अनुष्ठान धर्म नहीं॥ इस का उत्तर ऐसे समझना कि अवतारों के वे ही आचरण सर्वसाधारण के आचरणीय होते हैं जो धर्मशास्त्र के अनुकूल हों परन्तु जिन में प्रतिकूलता की आशंका होती है वे आचरण जीव के कथमपि कर्तव्य नहीं हैं। जैसे पृथ्वी को भारस्वरूप समझ के भगवान् ने स्वयं स्वकुल के नाश की इच्छा की और स्वयमेव शाप को प्रदान दिवा के स्वकुल का नाश किया प-

रन्तु यह कार्य और के करने का नहीं है॥ और शिव समस्त सृष्टि का संहार ही कर डालते हैं परन्तु उनका अनुकरण अल्पमात्र भी दूसरे को कर्तव्य नहीं है॥ अतएव श्री भा० स्कं० १० अ० ३३ श्लो० ३० ३१ ३२ श्रीशुक उवाच॥ "धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम्॥ तेजीयसां न दोषाय वन्हेः सर्वभुजो यथा,,॥ "नैतत्समाचरेज्जातु मनसाऽपि ह्यनीश्वरः। विनश्यत्याचरन् मौढ्याद्यथाऽरुद्रोऽब्धिजं विषम्"॥ ईश्वराणां वचः सत्यं तथैवाऽऽचरितं क्वचित्। तेषां यत्स्ववचो युक्तं बुद्धिमांस्तत्समाचरेत्"॥ अर्थात् जो प्रभु का उपदेश है वही धर्म है और उन के आचरण में भी जो उन के उपदेशानुकूल है वही धर्म है तद्विरुद्ध आचरण हो तो भी जीव के लिये वह धर्म नहीं है। अतएव मीमांसा दर्शन में महर्षि जैमिनि ने धर्म का लक्षण ऐसे कहा है॥

"चोदनालक्षणोऽर्थो धर्मः" और मनु, येनास्य पितरो याता येन याताः पितामहाः" इत्यादि वचन का भी यही तात्पर्य है कि विधि वाक्यों के अप्रतिकूल विषयों में सदाचार का ग्रहण करना न कि प्रति कूल

में। और यह ठीकही है क्योंकि अवतार में ऐश्वर्य और मानुष दोनों भाव मिले रहते हैं, सो मानुष-भावप्रधान लीला का तो अनुसरण करना परन्तु ऐश्वर्यप्रधान तो मनुष्य के लिये सर्वथा असाध्य है॥ और कृष्णावतार में ऐश्वर्य इतना परिपूर्ण है कि बात बात में झलकता है सो कृष्णलीला के अनुकरण की तो इच्छा भी न करना॥

प्रश्न (९) जिन गोपियों की भक्ति की पुराण, भक्तिमीमांसा, नारदपञ्चरात्र, शाण्डिल्य संहिता, प्राभृति अनेक प्रामाणिक ग्रन्थों में अत्यन्त प्रशंसा है यहां तक कि उन को प्रेमलक्षणा भक्ति की प्रथम उदाहरणस्वरूप कहा है उन्हीं गोपियों को अनुराग के सहचरित कामवासना का रहना अनुचित देख पड़ता है॥

उत्तर-जहां जहां गोपियों का भक्ति में उदाहरण दिया जाता है तहां उनका प्रेमांश ही लेके उदाहरण है न कि कामांश लेके और यह तो अवश्य ही है कि यदि ईदृश परमप्रेम के सहचरित इतना सा कामांश भी न रहता तो यह प्रेम और भी प्रशंसनीय होता। परन्तु यह भी समझना चाहिये

कि गोपियों का काम लौकिक काम सदृश नहीं था क्योंकि भगवद्विषयक था और भगवद्विषयक काम क्रोधादि सभी प्रशंसनीय हैं और भगवद्विषय होने पर भी भगवान की पूर्णब्रह्मत्वज्ञानपूर्वक तथा अनुरागप्रधान होने से गौणभूत काम भी अनुराग साधक होने से प्रशंसनीय है और यदि कामवासना कुब्जा में,—[“माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः। स्नेहो भक्तिरितिप्रोक्तस्तया मुक्तिर्न चान्यथा”॥ (नारद पञ्चरात्रे) - माहात्म्यज्ञान तथा अनुराग से रहित थी और केवल इन्द्रियलोलुपताप्रयुक्त थी अतएव श्री शुकाचार्य ने घृणा पूर्वक कहा है कि “दुर्भगेदमयाचत” और गोपियों को प्रभु का पूर्ण माहात्म्यज्ञान था जसे भा० स्कं० १० अ० ३१ श्लो० ४ “न खलु गोपिकानन्दनो भवानखिलदेहिनामन्तरात्मदृक्। विखनसाऽर्थितो विश्वगुप्तयेसख उदेयिवान् सात्वतां कुले” ॥“ व्यक्तं भवान् व्रजजनार्ति… प्रेष्ठो भवांस्तनुभृतां………“मृगयुरिव’ इत्यादि पञ्चाध्यायी वेणुगीत प्रभृति में स्पष्टहै अतएव नारदसूत्र २१, २२, २३ हैं “ यथा व्रजगोपिकानाम्। नतत्रापि माहात्म्यज्ञानविस्मृत्यपवादः। तद्विहीनं

जारा गाभिव" ॥ गोपियों को अनुराग तो प्रधान था ही और उन का कामांश भी धीरे धीरे अनुराग रूप ही से परिणत हो गया था इस से गोपियों का अनुराग सर्वप्रधान गिना जाता है ॥ अर्थात् किञ्चित् कामसम्बन्ध लेके ही तो यह कथन है कि " क्वेमाः स्त्रियो वनचरीर्व्यभिचारदुष्टाः" "स्त्रीणा ञ्चैत्रदुरात्मनाम्" तथा "गोप्यः कामात् इत्यादि और प्रबल अनुराग प्रवाह लेके यह कथन है कि " वन्दे नन्द-ब्रजस्त्रीणां पादरेणुमभीक्ष्णशः" इत्यादि।

और जिस समय वंशीनाद सुन के प्रभु के समीप सब गोपियां उपस्थित भईं उस समय भगवान् ने भी कामांश के विषय में असन्तोष पूर्वक उपदेश किया और अनुरागके विषय में सन्तोष प्रगट किया परन्तु इस रीति का स्पष्ट उत्तर सुन के जब अत्यन्त विकल होके गोपियों ने प्रार्थना की तब भगवान् ने केवल उनकी विकलता देख अनुराग को काम से उत्कट समझ और काम को अनुराग रूप से परिणत देख दया कर के उन के सङ्ग रासक्रीड़ा करी अ० २६ श्लो० ४२, " इति विक्लवितं तासां श्रुत्वा योगेश्वरेश्वरः। प्रहस्य सदयं गोपीरात्मारामोऽप्यरी-

रमत्॥" इस से जिस समय गोपियों का कामांश की अनुराग रूप से परिणत हो गया तब उस तात्पर्य से गोपियों की जितनी प्रशंसा की जाय उतनी थोड़ी है॥

इस को विशद रीति से ऐसे समझना कि गोपियों की प्रभु पर काम और अनुराग दोनों प्रकार की वृत्तियों से प्रेरित होकर गोपियों ने कात्यायनी का अर्चन किया और यह वर मांगा कि अ० २२ "नन्दगोपसुतं देवि पतिं मे कुरु ते नमः" अनन्तर उन के भाव की परीक्षा करने को भगवान् ने चीरहरण किया परन्तु उस समय उन का शुद्धभाव देख के भगवान बहुत प्रसन्न भये जैसे 'भगवानाह ता वीक्ष्य शुद्धभावप्रसादितः,। फिर वही शुद्धभाव देख के यह वरदान दिया कि 'संकल्पो विदितः साध्व्यो भवतीनां मदर्चनम्। मयानुमोदितः सोऽसौ सत्यो भवितुमर्हति' फिर भगवान ने उनके कामांश के विषय में ऐसे उपदेश किया कि "न मय्यावेशितधियां कामः कामाय कल्पते। भर्जिता क्वथिता धाना प्रायो बीजाय नेष्यते' इसके अनन्तर भी उनकी काम और अनुराग से मिश्रित वृत्ति देख के आप ने यह वर-

दान दिया कि "यातावला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः। यदुद्दिश्य व्रतमिदं चेरुरार्यार्चनं सतीः" ॥ अनन्तर जब भगवान् का वंशीनाद सुनके सब गोपिका उपस्थित हुईं तब प्रभु ने उनकी कामवृत्ति के विषय में उपदेश किया और स्नेहांश की प्रशंसा की जैसे कामवृत्ति के विषय में अ० २९ श्लो० २४, २५ २६ भर्तुः शुश्रूषणं स्त्रीणां परो धर्मो ह्यमायया। तद्बन्धूनां च कल्याण्यः प्रजानां चानुपोषणम् ॥ दुःशीलो दुर्भगो वृद्धो जडो रोग्यधनोऽपि वा। पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी॥ अस्वर्ग्यमयशस्यं च फल्गु कृच्छ्रं भयावहम्। जुगुप्सितं च सर्वत्र औपपत्यं कुलस्त्रियाः" ॥ और स्नेहांश प्रशंसा में श्लो० २३, २७ 'अथवा मदभिस्नेहाद् भवत्यो यन्त्रिताशयाः आगताह्युपपन्नं वः प्रीयन्ते मयि जन्तवः'॥ 'श्रवणाद् दर्शनाद् ध्यानान्मयि भावोऽनुकीर्तनात्। न तथा सन्निकर्षेण प्रतियात ततो गृहान्' ॥ इस के अनन्तर जब गोपी अत्यन्त विकल हो के रोदनपूर्वक विलाप करने लगी जैसे श्लो० २९ से ४१ तक ॥ तब भगवान् उनके अनुराग का प्राधान्य देखके और उनकी विकलता पर दया कर के तथा इतने अनुराग रहते

भी किञ्चित्कामांश है इस पर हंस के उन का अङ्गीकार किया जैसे श्लो० ४२ 'इति विक्लवितम् तासां दृष्ट्वा योगेश्वरेश्वरः॥ प्रहस्य सदयं गोपीरात्मारामोऽप्यरीरमत्॥" इत्यादि॥ परन्तु वह कामांश यद्यपि भगवद्विषय है, इस से लौकिक काम की अपेक्षा उत्तम है तथापि शुद्धानुराग की दृष्टि से प्रभु ने उसको त्याज्य समझा इस लिये "विषस्य विषमौषधम्" इस न्याय से तदुद्रेक ही उपचार किया जैसे श्लो० ४६ * "बाहुप्रसार" इत्यादि॥ और इस रीति के विहार से यह परीक्षा भी कर ली कि इस समय तो अनुराग के गाढ़े उद्गार से अहंकार और काम नहीं जान पड़ता है परन्तु यदि इन के हृदय में छिपे भये भी बीज हों तो उनका भी नाश कर के गोपियों का अनुराग निष्कलङ्क करना॥ अतएव इसी श्लोक के आगे कहा है कि गोपियों को तत् क्षण काम और अभिमान का प्रादुर्भाव हुआ परन्तु भगवान् कामाभिमानप्रिय नहीं है इससे उसी समय अन्तर्हित होगये जैसे श्लो० ४७॥ 'तासां तत्सौभगमदं वीक्ष्यमानं च केशवः॥ प्रशमाय प्रसादाय

* कोई कोई इस श्लोक को क्षेपक भी कहते हैं

तत्रैवान्तरधीयत' ॥ भगवान के अन्तर्हित होने पर क्रमशः गोपियों का मान और काम घटने लगा और महात्म्यज्ञानपूर्वक अनुराग बढ़ने लगा॥ यहांतक कि जब ढूंढ चुकी, अनुकरणलीला कर चुकी तथा गुणगान कर चुकीं, और इतने पर भी प्रभु का दर्शन नहीं हुआ तब काम और अभिमान निःशेष नष्ट हो गया और तब गोपी निः साधन हो आत्मविस्मरणपूर्वक रोदन करने लगी तब भगवान उस शुद्ध प्रेम से आकृष्ट होके स्वयं गोपीमण्डल के मध्य में प्रगट भये॥ उसके अनन्तर जब गोपियों ने भगवान से प्रश्न किया तब भगवान ने नीतिमय उत्तर में अनुराग ही को प्रधान रख के कहा कि अ० ३२ श्लो० २० "नाहन्तु सख्यो भजतोऽपि जन्तून् भजाम्यमीषामनुवृत्तिवृत्तये। यथाधनो लब्धधने वि-नष्टे तच्चिन्तयान्यन्निभृतो न वेद' ॥ इत्यादि। इस के अनन्तर गोपियों का काम तथा अभिमान रहित शुद्धानुराग प्रवाह ही रहा तब भगवान् ने गोपियों के संग दिव्य रासक्रीड़ा का प्रादुर्भाव किया और अब यहां से केवल शुद्धानुरागमय लीला का आरंभ हुआ। इसी से देवताओं ने भेरो बजाई और पुष्प-

दृष्टिकर के गान किया श्री दूसी प्रकरण में गोपियों को स्त्रीरत्न तथा कुशवधू पदों से श्री शुकाचार्य ने कथन किया है॥

इस रीति से ईदृश शुद्धानुराग होने पर भक्त गोपी प्रेमी मात्र को शिरोधार्य हुई॥ और जो गोपियों मे कामांश की आशङ्का है अथवा किञ्चिन्मात्र भी लौकिकता का कथन है सो प्रभु के अन्तर्हित होने के पहले ही के प्रकरण में कथन है और सो ठीक ही है क्योंकि प्रभु को भी वह काम भाव अङ्गीकृत नहीं हुआ और जितने प्रशंसा वचन हैं सो भगवान के अन्तर्धान के अनन्तर प्रगट होने के आगे के प्रकरण के हैं सो भी यथोचित ही हैं गोपियों की इन पूर्वापर दोनों अवस्थाओं का क्रम बिना समझे भ्रममूलक नाना शङ्काओं का उदय होता है परन्तु इस रीति के रहस्य समझने से गोपियों की उत्तरावस्था के शुद्धानुराग का लोकविलक्षणत्व प्रगट होता है॥

प्र० ११। जब परब्रह्म पूर्णरूप से अवतार ही के आगये तो उधर शून्य बच जाँयगे। और कला वा अंशरूप से इधर आये तो उधर भी खण्डित

रहेंगे। यह कैसा ?

उत्तर। पूर्वार्द्ध के पठन से यह शङ्का तो नहीं उदित हो सकती तथापि कोई वालकीला करे तो उसे यों समझना चाहिये कि सब गणित एक प्रकार के नहीं होते। लोक में ही देखो शून्य गणित कैसा विलक्षण है कि शून्य में चाहे कितने ही शून्य जोड़ दीजिये वह बढ़ेगा नहीं, शून्य में से शून्यपाद, शून्यार्द्ध, अथवा पूर्ण शून्य चाहे जितना और चाहे ज बेर निकालिये बचे शून्य में कुछ भी भेद न आवेगा। अनन्त में से सौ दो सौ लाख करोड़ चाहे जितना निकाल डालिये बचे में क्या भेद पड़ता है। एक दीप में से लाखों दीप-ज्योति बाल के निकाल लीजिये पूर्व प्रकाश में न्यूनता न आवेगी। एक ज्ञानी से लाखों पुरुष ज्ञान लाभ करें परन्तु उसके ज्ञान की घटी नहीं होती। वैसे ही जगद्विलक्षण ब्रह्म का भी यह विलक्षण स्वभाव है कि उस में से चाहे जितने अवतार हों वह ज्यों का त्यों रहता है। अतएव वेद में लिखा है कि "पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।

प्र० १२। ब्रह्म का प्रादुर्भूत हो कर अन्नवत् व्यवहार करना कहीं वेद में भी है कि नहीं?

उ०। है। सामवेदीय तलवकारोपनिषद् खण्ड ३। 'ब्रह्म ह देवेभ्यो विजिग्ये तस्य ह ब्रह्मणो विजये देवा अमहीयन्त त ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवाऽयं महिमेति तद्धैषां विजज्ञौ तेभ्यो ह प्रादुर्बभूव तन्न व्यजानन्त किमिदं यक्षमिति॥ १५। २॥ तेऽग्निमब्रुवन् जातवेद एतद्विजानीहि किमेतद् यक्षमिति तथेति॥ १६। ३॥ तदभ्यद्रवत् तमभ्यवदत् कोऽसीति अग्निर्वाऽहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीति॥ १७। ॥ ४ अस्मिं स्त्वयि किं वीर्य्यमित्यपीदं सर्वं दहेयं यदिदं पृथिव्यामिति॥ १८। ५॥ तस्मै तृणं निदधावेतद्दहेति, तदुपप्रेयाय सर्वजवेन तन्न शशाक दग्धुं स तत एव निववृते नैतदशकं विज्ञातुं यदेतद्यक्षमिति॥ १९। ६॥ अथ वायुमब्रुवन् वायवेतद् विजानीहि किमेतद् यक्षमिति तथेति॥ २०। ७॥ तदभ्यद्रवत् तमभ्यवदत् कोऽसीति, वायुर्वा अहमस्मीत्यब्रवीन्मातरिश्वा वा अहमस्मीति॥ २१। ८॥ तस्मिंस्त्वयि किं वीर्य्यमित्यपीदं सर्वमाददीयं यदिदं पृथिव्यामिति॥ २२। ९॥ तस्मै तृणं निदधावेतदादत्स्वेति तदुप-

प्रेयाय सर्वज्ञवेन तन्न शशाकादातुं स तत एव निवृ-
वृते नैतदशकं विज्ञातुं यदेतद्यक्षमिति' ॥ २३ ।
१० ॥ इत्यादि इस प्रकरण से स्पष्ट विदित होता है
कि जब देवताओं को अभिमान हुआ तब परब्रह्म
यक्षरूप से प्रादुर्भूत हुए। देवता लोग न समझ
सके कि यह कौन है तब उन ने अग्नि से कहा
कि देखो समझो तो यह कौन है। अग्नि उनके
समीप गया तो ब्रह्म ने अग्नि से पूछा "तुम कौन
हो?" अग्नि ने अपना नाम कहा तब ब्रह्म ने
पूछा "तुम में क्या सामर्थ्य है", उसने कहा "मैं
सब कुछ को दग्ध कर सकता हूं"। तब ब्रह्म ने
एक तृण रख के कहा "इसे जलाओ" पर उसने
कितना ही बल लगाया परन्तु न जला सका। तब
फिर आया और बोला मैं नहीं समझ सका। तब
देवताओं ने वायु को भेजा उस से भी ब्रह्म ने
नाम और सामर्थ्य पूछा उसने अपना नाम कहा
और सब कुछ उड़ाने का सामर्थ्य बतलाया (क्या
ब्रह्म उनका नाम औ सामर्थ्य नहीं जानते थे कि
अज्ञवत् पूछने लगे?? नहीं यह लीला है। ऐसा ही
रामादि का भी हनुमान आदि से नामादि पूछकर

अज्ञवत् व्यवहार करना लीलाका भूषण है दूषण नहीं) ब्रह्म ने कहा इस तृण को उड़ाओ पर वायु ने कितनी ही कला खेली परन्तु उड़ा न सका। तब फिर आया और बोला " मैं इसे नहीं समझ सका" ॥ यह लम्बा प्रकरण है। ऐसे ही अनेक देवताओं का आना और ब्रह्म से आलाप करना है

प्र० १३। वेद के मन्त्र अथवा ब्राह्मण भाग में कहीं किसी अवतार का यथाक्रम सविस्तर वर्णन भी है ?

उ०। है देखो शतपथ ब्राह्मण मे क काण्डिकाओं से मत्स्यावतार का निरूपण है। काण्डिका,-"मनवे ह वै प्रातः अवनेग्यमुदकमाजह्रुः। यथेदं पाणिभ्यामवनेजनायाहरन्ति, एवं तस्य अवनेनिजानस्य मत्स्यः पाणी आपेदे,,। १।

स ह अस्मै वाचमुवाच, बिभृहि मा पारयिष्यामित्वा कस्मान् मां पारयिष्यसि ? इति औघ इमाः सर्वाः प्रजा निर्वोढ़ा ततस्त्वा पारयिताऽस्मि इति। कथं ते भृतिरितिस ह उवाच, यावद्वै क्षुल्लका भवामो वह्वीवैनस्तावद् नाष्ट्राभवति उतमत्स्यएव मत्स्यं गिलति कुम्भ्यां मा अग्रे बिभरासि। स यदा तामतिवर्धै

अथकर्षूं खात्वा तस्यां मां बिभरासि, यदा तामतिवर्धै अथ मा समुद्रमभ्यवहरासि, तर्हि वा अतिनाष्ट्रो भवि तास्मि इति । ३ । शश्वद्ध झष आस, सहि ज्येष्ठं वर्द्धते, अथ यतिथीं समां तदौघ आगन्तातन्मा नावमुप-कल्प्योपासासै स औघ उत्थिते नावमापेद्रे, तं स मत्स्य उपन्यापुप्लुवे, तस्य शृङ्गनावः पाशं प्रतिमुमोच तेनतं मुत्तरं गिरिमतिदुद्राव । ५ । सहोवाच अपीपरंवै त्वावृ-क्षे नावं प्रतिबध्नीष्व, तंतुत्वा मागिरौ सन्तमुदकमन्त-श्छैत्सीद्, यावदुदकं समवायात् तावत् तावदन्व अव-सर्पासि इति, । स ह तावत् तावदेवान्ववससर्प तद-प्युत्तरस्यगिरेर्मनोरवसर्पणमिती, औघो ह ताःस र्वाः प्रजानिरुवाह अथेह मनुरेवएकः परिशिशिषे । सोऽ-र्चंश्छ्रम्यंस्तपश्चचार प्रजाकामः" । ६ । (१ । ६ ।

१ । ६ इन कण्डिकाओं का तात्पर्य्य यह है कि जिस प्रकार अवनेजमान (अपने हाथों से जल सेचन क-रनेवाले) को जल लाया जाता है वैसे प्रातः अवने जन केलिये मनु को भी जल लाया गया । जब वह तर्पण करने लगा तो हाथों में एक मत्स्य आगया और बोला कि तू मुझे पाल तो मैं भी तेरी रक्षा करूंगा। [तबदोनो के यों बातचीत हुई] (उ०) हमलोग छोटे रहते हैं तो बड़ी आपत्ति आती है यहाँ तक

कि मछली को मछली भी गटक जाती है सो पह-
ले मुझे घडे में रखो मैं उससे बढूं तो कोई गड्ढी
खोदकर उसमें रखो उससे भी बढूं तो मुझे समुद्र
में छोड़ देना । फिर कोई आपत्ति न रहेगी ॥ और
वह वैसे ही बढने लगा और कहा कि इतने समय
के अनन्तर बाढ आवेगी तब तू नाव कल्पना कर
मेरी राह देखना । बाढ़ आने पर मैं तुझे बचाऊंगा ॥
मनु ने वे बातें मानी और वैसे ही समुद्र में छोड़ दि
या । उतने ही समय पर वहां मनु प्रतीक्षा कर
रहेथे कि भारी बाढ़ आई । उसमें वह महामत्स्य
भी पहुंचा उसको एक शृङ्ग सा देखपड़ा उसीमें
नाव बांधी और वह इसे हिमालय की ओर ले भागा ।
फिर कहा कि तुम अब इसे हिमालय के वृक्ष में
बांध लो और जब जल हटे तो साथ साथ उतरते
आना । मनुने वैसाही किया । और सब नष्ट हुए
मनु बचे फिर उनने तप किया ॥

इति । उत्तरार्द्ध समाप्त ।

———०※०———

श्रीहरिः।

अथ

छात्राणामुपयोगाय निबद्धा

अवतारमीमांसाकारिका।

नत्वाश्रीसच्चिदानन्दंसर्वदिव्यगुणाश्रयम् । तस्यो-
वतारविषयेमीमांसाक्रियतेऽधुना ॥ १ ॥ मध्येमध्ये-
ऽवतरतिभगवान्हरिरीश्वरः । तमाश्रित्यैवसर्वेषांपु-
राणानामुपक्रमः ॥ २ ॥ श्रवणंकीर्तनंचापितदाल-
म्बंप्रधानतः । रामकृष्णादिमूर्त्तीनांपूजनंचतदाश्रय-
म् ॥ ३ ॥ अर्च्चाचपादसेवाचतदभावेभावेत्कथम् ।
पादादिसम्भवोनस्यान्निराकारेपरात्मनि ॥ ४ ॥ सा-
कारोऽपिपरोक्षश्चेत्कथमर्च्यौतमानवैः । अतोऽवतार-
सत्वेहिसेवार्च्चादिकसम्भवः ॥ ५ ॥ अनुगृह्णातिदे-
वोऽसावन्तीर्यपुनःपुनः । संहितासुपुराणेषुवरटा-
घोषेणकथ्यते ॥ ६ ॥ तथैवभक्तिसूत्राणितदालम्बा-
निभान्त्युत । गोप्युदारणस्याऽन्नान्यथासङ्गतिर्भवे-
त् ॥ ७ ॥ आजानिकेऽवतारस्यस्वीकारेऽपिचकेचन ।

नसंशयोऽस्त्यन्निल्येषोमीमांसारम्यतेस्फुटम् ॥ ८ ॥ सर्वशक्तिमतःकिंस्यादवशिष्टंप्रयोजनम् । यत्सिद्धिंनान्यथापश्यन्देवःसोऽवतरेद्भुवि ॥ ९ ॥ इतिप्रश्नेऽवतारस्यप्रयोजनविचारणे । विष्णायैतांजगत्सृष्टिंवर्णतेकिंप्रयोजना ॥ १० ॥ एकाकीनैवरमतइत्यादिश्रुतिलक्षितम् । रमणंयदितत्तत्तदत्रापिकथंनहि ॥ ११ ॥ लीलाप्रियोऽयंभगवान्लीलार्थंकुरुतेऽखिलम् । लीलारङ्गालयेलीलाःपात्रत्वेनावलम्बते ॥ १२ ॥ विनाविनोदंनोकार्यंक्रीडनेनेहदेहभाक् । मनुष्यधर्मशीलस्यलीलामाजगतःपतेः ॥ १३ ॥ एतद्भागवते-विष्णुपुराणेस्पष्टमीरितम् । लीलाचाऽप्यस्यकिंमूलातद्ददभगवान्स्वयम् ॥ १४ ॥ तूष्णीकताऽस्मन्विषयेनूनंसर्वंसतेसमा । सऐक्षतादिश्रुत्युक्ताजगत्कारणतास्फुटा ॥ १५ ॥ लीलामूलत्वसत्त्वेऽपिभात्युद्देश्यत्रयंपुनः । प्रथमंदुष्टदमनंसतांसंरक्षणंतथा ॥ १६ ॥ द्वितीयंधर्मरक्षातोजगतोमङ्गलंमहत् । तृतीयंचानिजलीलानांप्राचुर्येमधुरीकृतम् ॥ १७ ॥ तत्तत्समयसंस्थानांसाक्षात्कारकृतांसताम् । सौकर्य्यंसाधनंसम्यक्परोक्षाणांभविष्यताम् ॥ १८ ॥ भगवद्वचनंव्यासभाषितंचपुनःपुनः । पूर्वोद्देश्यत्रयस्यास्तिसाधकंबु-

ध्यतांवुधैः॥ १९॥ प्रयोजकत्रयं चैवावतारेषु विलोक्यते। इच्छा भगवतो भक्तप्रार्थना प्रकृतिस्तथा॥ २०॥ संजा-घटीति लोकैश्चित्तस्येच्छा यदि नो भवेत्। यथैव प्रार्थ्य-ते भक्तैस्तथापि कुरुते विभुः॥ २१॥ इच्छाप्रार्थनयोरेवं सत्वेऽपि समपेक्ष्यते। प्रायोऽवतारसमये प्रकृतिर्देश-कालयोः॥ २२॥ विजिह्मैर्वर्जने समये मत्स्यरूपो यथा-ऽभवत्। जलस्थले मन्दरधृक् कूर्मोऽभूच्च महीस्थिषु ॥ २३॥ ॥ वलवाहुल्यसत्वेऽपि स्वयं यान्ति नृपा वन-म्। सकष्टं च सहाया स्तैर्लब्ध्वा ग्रानगजान् मृगान् ॥ २४॥ कचित्कान्ताः कचिद्भ्रान्ताः कचिल्लिता स्वबुभुक्षि-ताः। स्थिताः पाषाणखण्डेषु क्रन्दा यत्र नृपाधिपः॥२५॥ तथा लीलाप्रियो देवो रमते वसुधासु वै। आयस्तवतज्जा-यते लीलाऽऽयासो जगदीशितुः॥ २६॥

इति प्रथमो विचारः

अल्पं सर्वव्यापकस्य परिमाणं कथं भवेत्। द्वितीयो जा-यते प्रश्नो भीमांस्यः सोऽपि सज्जनैः॥ २७॥ वस्तुतः प-रिमाणस्य परिणामो न जायते। मानान्तरैकार्य तस्मा-द्ब्रह्मणः स्वरूपमानता॥ २८॥ अल्पमानानसन्दृश्ये-तेऽवतारास्तु हरेरिमे। इत्थं वं पूर्वपक्षस्य प्रसरो जाय-

तेस्फुटः ॥ २९ ॥ समोद्यते ऽचोदाहरणं गगनं वर्त्तते स्फुटम्। भूतोत्पत्तिर्नगगनाद्व्यापकाद्दृश्यतेक्वचित् ॥ ३० ॥ गगनंव्यापकंनाद्यचेतनंपरिलक्ष्यते। उदाहृतिवलात्तस्मिंपरमात्मनिरूप्यताम् ॥ ३१ ॥ विजातोयस्वभावेऽस्मिन्महेशेपरमात्मनि। वैजात्यामहत्वं नत्वंवैयात्यमहत्वंभवेत् ॥ ३२ ॥ अणोरणीयान्महतोमहीयान्श्रूयतेहरिः। नमोक्तस्तायहृहतेकथ्यतेयाजुषेःसदा ॥ ३३ ॥ वहूनिपरिमाणानिसन्तिसर्वेगुणेहरौ। लौकिकेषुविरुध्यन्तिनब्रह्मणिमहेश्वरे ॥ ३४ ॥ अथवासर्वगोदेवोदिव्यंरूपंचकुत्रचित्। आविष्करोतिकालत्रपरिणामविपर्य्ययः ॥ ३५ ॥ वहून्यपिस्वरूपाणिक्वचित्प्रथयतिप्रभुः। यथारासेद्वारकायांनारदागमनेतथा ॥ ३६ ॥ एकरूपेऽनपमानोंनवहुत्वेनविभागभाक्। नाल्पधर्मेऽप्यणुत्वंव्यापकत्वमहेशितुः ॥ ३७ ॥ वैलक्षण्यंनदोषायनवामानविपर्य्ययः। श्रूयतेश्रयंते,ऽप्येवंसर्वंप्रश्नोनिरर्थकः ॥ ३८ ॥

इतिद्वितीयोविचारः

———※———

अलौकिकमहालीलाविशिष्टःपरमेश्वरः। किंधर्त्तमानवौलीनाव्यापारेऽयंनशोभते ॥ ३९ ॥ अतोहि-

तद्विशिष्टेषुनावतारत्वकल्पनम् । मनीषिणांमनीषानुकूपाऽपगमतेऽस्त्विति ॥ ४० ॥ तृतीयस्ययंप्रश्नोमीमांस्य:सोऽपिपण्डितै: । नसम्भवोमहेशेऽस्यायुद्धाद्यासादिसम्भव: ॥ ४१ ॥ दृश्यतेसप्रतिपदंरामकृष्णादिषुस्फुटम् । अतोनेशावतारत्वंतत्संज्ञाघटीतिभि: ॥ ४२ ॥ कृत्यंवंपूर्वपक्षेऽपिजृम्भमाणेसमीक्ष्यताम् । कस्यास्तिसम्भवोदैवेकस्यवानास्तिसम्भव: ॥ ४३ ॥ तस्मिन्माभूज्जडत्वंवावद्धत्वंवाऽथदु:खिता । लीलाप्रियंचकोनस्याल्लीलांश:परमेश्वरे ॥ ४४ ॥ राजाकोऽपिनिकोद्यानेरङ्गशालांकरोतिचेत् । तत्रनाटकलीलायांस्वयंचेद्यातिपात्रताम् ॥ ४५ ॥ अन्यंतत्रनिजंभृत्यंकरोतिधरणीपतिम् । सिंहासनेतंसंस्थाप्यस्वयंचेद्यातिभृत्यताम् ॥ ४६ ॥ तत्प्रभुत्वक्षतिस्तत्रलीलायांजायतेनुकिम् । लीलायामपिकिंतद्विसंस्तथात्वंनैवशोभते ॥ ४७ ॥ किंतस्मिन्नपिकालेऽस्यसार्वात्म्यंन्यूनतांगतम् । तुष्टोहृष्टोऽथवातत्रतदीयफलदोनकिम् ॥ ४८ ॥ लीलायांशोकभीत्यादिदर्शनंकिंनुदोषकृत् । एवंमहेश्वरेलीलालीलोक्तासित्वसत्यत ॥ ४९ ॥ सृष्टिजालस्यरचनाकथंसंशोभतेहरौ । लीलार्थंसाशोभतेचेदपराद्धंकिमन्यथा ॥ ५० ॥ सर्वस-

स्माव्यतेलीलाविलासिभिःसतेऽखिलम् । एवंतृतीय-
प्रश्नस्यनोत्थानावसरःक्वचित् ॥ ५१ ॥ "यथायथो-
पासते"सुतथासभवतिप्रभुः । एवंदेहोवरदराड्भ-
क्तास्यर्थनसाधकः ॥ ५२ ॥ भुविमानवतासिन्धकामा-
न्पूरयतिप्रभुः । प्रयोजनकत्रयव्याख्याप्रथमेसासमोरि-
ता ॥ ५३ ॥ "उच्चावचेषुभूतेषुचरन्वायुरिवेश्वरः ।
नोच्चावचत्वंभजतेनिर्गुणत्वाद्धियोगुणैः ॥ ५४ ॥" श्री-
मद्भागवतेव्यासदेवेनेत्यंसमीरितम् । अतोनाकाश-
वद्देवःसम्यक्लिप्यतेक्वचित् ॥ ५५ ॥ "मनुष्यदेहिनां-
चेष्टामित्येवमनुवर्त्ततः । लीलाजगत्पतेस्तस्यच्छन्द-
तःसम्प्रवर्त्तते" ॥ ५६ ॥ एवंविष्णुपुराणेपिलीलाम-
र्म्मनिरूपितम् । तस्मात्तृतीयप्रश्नोऽपिपूतिकूष्माण्ड-
तांगतः ॥ ५७ ॥

इतितृतीयोविचारः ।

———ooo———

तिर्य्यग्योनिषुदेवस्यावतारोनैवशोभते । इयमु-
क्तिश्चतुर्थोचेन्निरस्यापूर्ववद्बुधैः ॥ ५८ ॥

इतिचतुर्थोविचारः ।

———o———

रामादिष्ववतारेषुजीवाधिक्यंकिमस्त्युत । य-

द्दालव्याऽनक्षत्येलावतारत्वंमहेशितुः ॥ ५९ ॥ अयं-
चेत्पञ्चमःप्रश्नःपूर्वपक्षोऽत्र लक्ष्यते । प्रतापिजीवलैव-
स्यान्माभूच्चावतारिता ॥ ६० ॥ समीक्षा क्रियतेजीव-
वैलक्षण्यविचारणे । सर्वोऽप्यद्भुतलीलैर्ज्ञेयाजीव-
विलक्षणा ॥ ६१ ॥ अतस्तमद्भुतंव्यासउपक्रम्यन्य-
रूपयत् । वसुदेवोऽवतारत्नसङ्घासोऽहन्वक्षौसुतम् ॥ ६२ ॥
चित्ताकर्षणरूपंचमाधुर्यंकुत्रविद्यते । जीवेषुदुर्लभ-
तरमवतारेषुदृश्यते ॥ ६३ ॥ "अरूपन्द्रुतंगतिमताम्"
तरूणांपुलकस्तथा । विहगानांवशीकारःपशूनामपि-
मोहनम् ॥ ६४ ॥ जीवेनसक्षमत्यं तद्ब्रह्मण्येवविलो-
क्यते । "तस्यानन्दस्यभूतानिमात्रांजीवन्ति" कथ्यते
॥ ६५ ॥ स"आनन्दमयोऽभ्यासात्" "रसोवैसः" उदीरि-
तः ॥ "तस्मिंश्चित्तंसर्वमेतंप्रजानां" यात्रुषिस्फुटम्" ६६ ॥
आद्भुत्यंचाथमाधुर्यंवैलक्षण्यमुदाहृतम् ॥ रामकृष्णा-
दयस्तस्मादवताराःप्रकीर्तिताः ॥ ६७ ॥ अतोनपञ्चमः-
प्रश्नोलभतेप्रसरंक्वचित् ॥ अवतीर्णोदेवदेवस्साक्षाद्ब्रा-
साद्रिरूपधृक् ॥ ६८ ॥

इतिपञ्चमोविचारः।

———ooo———

अवताराबहुविधाःपुराणेषुनिरूपिताः ॥ केचिद्-

ंशावताराः स्युः केचित् पूर्णा निरूपिताः ॥ ७१ ॥
तयोः कश्चन भेदोऽस्ति न वा तत्प्रविचार्यताम्।
नास्ति चेत् सङ्गतिं यायात् 'एते चांशकलाः' कथम् ॥ ७२ ॥
अस्ति चेद् ब्रह्मरूपाः स्युरेकेऽन्ये च तदंशकाः।
ततोंऽशानां जीवसाम्यं जीवस्यापि यतोंऽशता ॥ ७३ ॥
'अंशो नानाव्यपदेशात्' 'ममैवांश' इतीरितम्।
अंशेषु तारतम्यं चेद् भवेदुत्तमजीवता ॥ ७४ ॥
एवं चेज्जायते प्रश्नः पष्टो विनिगमास्पदः।
पूर्णावतारता तु स्यादंशता सम्भवेन्नहि ॥ ७५ ॥
अत्रोच्यते ब्रह्मता तु सर्वत्रापि समा मता।
यादृशो वामनो रामो नृसिंहस्तादृशो हरिः ॥ ७६ ॥
लीला यत्र कृता पूर्णा पूर्णत्वं तत्र भाषितम्।
अल्पोद्देश्यात्कलीला चेदंशत्वमुपचर्यते ॥ ७७ ॥
यथा रामावतारेऽस्ति रीतिनीतिनिदर्शनम्।
शरणागतवात्सल्यं पूर्णं पूर्णा च सत्यता ॥ ७८ ॥
पूर्णा दया धृतिः पूर्णा पूर्णा विद्या च वीरता।
अतोऽसौ पूर्णमर्यादो रामः पूर्णः परेश्वरः ॥ ७९ ॥
कृष्णेन च स्पष्टतया पूर्णता प्रकटीकृता ॥
आङ्गुत्वं रसरूपत्वं गुणित्वं बहुरूपता ॥ ८० ॥
लीलाप्रियत्वं स्रष्टृत्वं गुरुत्वं ज्ञानरूपता।

विरुद्धधर्माश्रयत्वं ह्यरित्वं तत्प्रसाधकम् ॥ ८१ ॥
भेदे पूर्णांशयोरेवमुपचारैर्निरूपिते ।
षष्ठस्य पूर्वपक्षस्य न गतिः कापि विद्यते ॥ ८२ ॥

—— ० ——

शरीरमवताराणां दिव्यं वा पाञ्चभौतिकम् ।
प्रश्नेऽस्मिन् सप्तमे जाते पूर्वपक्षो विजृम्भते ॥ ८३ ॥
असिद्धादिव्यता यावत् तावद्बाधवतर्कतः ।
जन्मवृद्धिक्षतादेस्स्वोकार्यं पाञ्चभौतिकम् ॥ ८४ ॥
अधुनैतस्य विषये सगाम्भीर्यं विचार्यताम् ।
'आनन्दमात्रकरपादमुखोदर' ईरितः ॥ ८५ ॥

अलौकिकस्वरूपस्य श्रुतं सर्वमलौकिकम् ।
तदेवं शब्दसिद्धं चेत्कथ्यते किमसाधितम् ॥ ८६ ॥
दृष्ट्वा कांश्चिद् गुणान् भौतान् भौतत्वं यदि कल्प्यते ।
अलौकिकगुणोल्लेखेऽलौकिकत्वं न किं भवेत् ॥ ८७ ॥
नापि सत्प्रतिपक्षस्य शङ्का कार्या कथंचन ।
अलौकिकाभावयुता यदि स्युर्लौकिका गुणाः ॥ ८८ ॥
तदैव साध्याभावं ते साधयेयुर्न चान्यथा ।
साध्यं चालौकिकत्वं हि तस्य सर्वेऽपि साधकाः ॥ ८९ ॥
अलौकिकस्य धर्मस्य यदि स्युः सहवर्तिनः ।
तत्यपि स्युर्लौकिकास्ते साध्यं संसाधयन्त्युत ॥ ९० ॥

दृश्येन चेत् कोऽपिजनः सर्वैर्लौकिकगुणैर्युतः ।
अन्तर्द्धानस्य पुनः कथ्यतेऽलौकिको जनैः ॥ ९१ ॥
एकोऽप्यलौकिको धर्मः कोटिशो लौकिकान् गुणान् ।
विमथ्नाति हरेर्नाम यथा पापानि कोटिशः ॥ ९२ ॥
विग्रहाण्यवताराणां तस्माद् दिव्यानि सन्त्युत ।
चिकित्सा विचिकित्साया इह तर्कैर्निरूपिता ॥ ९३ ॥

अवतारग्रहे बाधाभावेऽपि परिसाधिते ।
अस्ति तत्र प्रमाणं किं प्रश्नोऽयं जायतेऽष्टमः ॥ ९४ ॥
एवं प्रमाणसद्भावे कैश्चिच्चेत् प्रश्यते क्वचित् ।
ईदृशे धर्मविषये प्रमाणं किं परीक्ष्यताम् ॥ ९५ ॥
सद्भिरूरीकृतो नित्यं स्वीकार्यो विषयो जनैः ।
सदानन्दाग्रही दृष्टो मन्वादीनां महात्मनाम् ॥ ९६ ॥
अवतारः स्वीकृतोऽस्ति मुनिभिर्नारदादिभिः ।
आचार्यैः सम्प्रदायानां संहिताकारकैर्बुधैः ॥ ९७ ॥
निबन्धकारकैः प्राज्ञैः कविभिः पण्डितैर्हितैः ।
तस्मात् सदादृते कार्ये कार्यो नैवाऽत्र संशयः ॥ ९८ ॥
"वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च" ॥ ९९ ॥
मनुप्रोक्ता प्रमाणानामियमस्ति परम्परा ।

पूर्वानुक्ते परं मानं विज्ञेयं पूर्वपूर्ववत् ॥ १०० ॥
पूर्वोक्ते परतो ज्ञेयमनुक्ते तत् स्वतस्तथा ।
विरोधे पूर्वमेवाऽत्र ग्राह्यं परंनैव क्वचित् ॥ १०१ ॥
पूर्वाविरोधेन यदि स्वीकृतं भारतेऽखिलैः ।
आर्य्याचारप्रचारेऽत्र संशयप्रसरः कथम् ॥ १०२ ॥
पुराणानां प्रमाणत्वं छान्दोग्ये स्पष्टमीरितम् ॥
बृहदारण्यके चापि नेह संदेहसम्भवः ॥ १०३ ॥
प्रमाणमासीत् प्रत्यक्षमवतारसमुद्गमे ।
तद्दृष्टृभिः परस्ताच्च शब्देनावोधि तत्स्थितिः ॥ १०४ ॥
तच्छ्रोतृभिः पुनः शब्दैरितरे बोधिताः स्फुटम् ।
पौनःपुन्यैः समायातः शब्दोऽद्यापि विजृम्भते ॥ १०५ ॥
प्रसिद्धेश्चानुमानेनावतारित्वं प्रसिद्ध्यति ।
वेदेन बोध्यते सर्वं ततः कोऽन्वधिकः परः ॥ १०६ ॥
'सद्दीवाचे' त्यादिनाथ वक्ति गोपालतापनी ।
सर्वं कृष्णावतारस्य तत्त्वं तत्र निरूपितम् ॥ १०७ ॥
तथा यजुःसंहितायां "मिदं विष्णुर्विक्रमे" ।
"विष्णो र्नुकं" श्रुतिरियं "प्रजापति" रियं तथा ॥ १०८ ॥
ऋग्वेदेऽपि "दशानामेका" मित्यादिनिरूपितम् ।
"प्रतद्विष्णुः" "प्रकाव्यं" च "कृष्णांतम" इति श्रुतिः ॥१०९॥
"सद्योजातस्य ददृशानमोजो "ऽथ "ऋतस्य हि" ।

"यस्मिन् विश्वान्या" चिके चा 'प्यपिवत् कद्रुवः सुतस"
छान्दोग्योपनिषद्भागेऽ"यैतदा"दि समीरितम् ॥ ११० ॥
श्रुतिभ्योऽप्यधिकं मान्यं प्रमाणं किमपेक्ष्यते ॥ १११ ॥
तस्मात् सर्वशिरोधार्यप्रमाणैः प्रमितः प्रभुः ।
लीलावतारकलनो हरिर्विजयतेतराम् ॥ ११२ ॥
इत्येवमष्टमः प्रश्नः स्थितिं न लभते क्वचित् ।
नावतारस्य विषये सन्देहः कोऽपि शिष्यते ॥ ११३ ॥

इति पूर्वार्द्धम्

बालानां चेदुपप्रश्नाः केचित् स्युरपरे पुनः ।
तेऽपि त्वन्तर्भवन्त्येव पूर्वोक्तेषु न संशयः ॥ ११४ ॥
तथापि कथ्यते किञ्चिदपरं तद्विचारणम् ।
एतत्पर्य्यालोचनेन शङ्कापङ्को निवर्त्तते ॥ ११५ ॥
सीतावियोगवैकल्यं रामचन्द्रे विलोक्यते ।
कृष्णस्य बन्धनं चैव नावतारत्वसाधकम् ॥ ११६ ॥
प्रामाण्यं न पुराणानामुरीकुर्मः कथंचन ।
एवं पृच्छन् तृतीयां किं समीक्षां नैव पश्यति ॥ ११७ ॥
किं चाऽभावे पुराणानां क दृष्टं तन्निरूपणम् ।
स प्रमाणं न वा तस्य यस्मिन् ग्रन्थे विलोकितम् ॥ ११८ ॥
आद्यं चेत् साधनीयं किं नास्ति चेत्खंड्यते किमु ।
एवं विकल्पासहत्वात् पृच्छा न लभते स्थितिम् ॥ ११९ ॥

लेशोऽपि लौकिकत्वस्य यदि नैव भवेद्धरौ।
अवतारः कीदृशोऽस्य मनसापि न कल्प्यताम्॥ १२०॥
लौकिकत्वालौकिकत्वं मिश्रितं यत्र दृश्यते।
अवतारः स विज्ञेयो हरेरानन्ददायकः॥ १२१॥
सर्वैरसैश्च माधुर्यैः पूर्णा लीला महेशितुः॥
हरन्ति हृदयं ह्येषां सर्वेषां क्षणमात्रतः॥ १२२॥

—— ० ——

केचिच्च पण्डितंमन्यास्तर्ककर्कशकल्पनाः।
रूपकातिशयोक्त्यैव लापयन्ति कथा इमाः॥ १२३॥
तेषां तु हृदयं लङ्का ज्ञानं रामः समीरितः।
विभीषणः सत्वगुणो रावणश्च रजोगुणः॥ १२४॥
तमोगुणः कुम्भकर्णो जगज्जलधिरेवच॥
दुर्वृत्तयो राक्षसाश्च वानराश्च सुवृत्तयः॥ १२५॥
तेषां न तत्त्वतो रामो रावणो वाऽस्ति कश्चन।
नायोध्या चित्रकूटो वा लङ्का वा क्वाऽपि वर्त्तते॥ १२६॥
एवं चेत्प्रत्यक्षबाधो दृश्यतेऽद्यापि तत्स्थलम्।
कियत्सत्यं कियन्मिथ्या कल्पनेयं तु नोचिता॥ १२७॥
यदि चेद्रामवंशीया लभ्यन्तेऽद्यापि मानवाः।
राम एव कथं मिथ्या स्यादलङ्कारमात्रगः॥ १२८॥
रूपकातिशयोक्तौ च क्रमोहि परिकल्प्यते।

मिथ्याभूतं न किंचित्स्याद्यच्च तत्सम्भवेत् कथम् ॥ १२९ ॥
गीतोपदेशं किं कुर्य्यात् कृष्णो रूपकमात्रगः।
कल्प्यस्तस्यार्जुनस्यापि कथं पौत्रः परीक्षितः ॥ १३० ॥
अतो न कल्पनामात्रेणोचितं तत्त्वगोपनम्।
भक्तानुकम्पी भगवानवतारो जयत्यसौ ॥ १३१ ॥

ईशः को वक्ति चेत्कोऽपि रामभार्गवयोर्द्वयोः।
द्वौ चेद्द्वित्वं न चेत् किं स्याद् द्वयोरप्यवतारिता ॥ १३२ ॥
सैव देवस्त्वेक एव रूपे द्वे लीलया दधे।
अनेकरूपरूपः स भारतादौ निगद्यते ॥ ॥१३१
मीमांसायां द्वितीयायां स्पष्टमेतदुदीरितम्।
नानारूप्येपोऽकरूपो यथेच्छं स प्रकाशते ॥ १३४ ॥

वदेत् कश्चित् कथा भेदात् कथं विनिगमो भवेत्।
विरोधस्तु महान् दृष्टः पुराणानां परस्परम् ॥ १३५ ॥
तदसच्छेष भागेन सिध्यत्येषावतारिता।
विरुद्धांशपरित्यागो नावतारित्वबाधकः ॥ १३६ ॥
भवेत्तात्पर्य्यभेदो वाऽन्योर्थः कल्पान्तरं च वा।
लेखप्रमादः क्षेपो वा बोधवैकल्यमेव वा ॥ १३७ ॥
शङ्कापङ्क कलङ्कोयं नावतारे ततो भवेत्।

अङ्गी नाङ्गीकरोत्येषाऽतो वतारप्रतारणम् ॥ १३८ ॥

—०—

कोऽपि भाषेत चेत् कृष्णः क्वचित् पूर्ण उदीरितः ।
क्वचिदंशोऽविनिगमाद् द्वयं किंननिरस्यते ॥ १३९ ॥
तुच्छा पृच्छा यतस्तत्त्वार्थस्तेषांनावधारितः ।
सिद्धान्ते पूर्णता प्रोक्तांशतास्याल्लोकभाषणम् ॥ १४० ॥

—०—

बाल्हश्चेत् कथयेत् कोऽपि रामेणानुचितं कृतम् ।
ताडका स्त्री हता बालिरधर्मेण विनाशितः ॥ १४१ ॥
वने निर्वासिता सीता गर्भिणी सा तपस्विनी ।
तस्मान्नास्मिन्नीश्वरत्वं भवत्वेष नरोत्तमः ॥ १४२ ॥
एवं तृतीया मीमांसा परिपूर्णा तदुत्तरम् ।
बुद्धं चाऽस्त्यन्यथासर्वंतत्त्वं नैव विवेचितम् ॥ १४३ ॥
पित्राज्ञप्तं कौशिकोक्तिः पालनीयास्ति सर्वथा ।
गुरुणा कौशिकेनाथ तथाज्ञप्तं वनस्थले ॥ १४४ ॥
तत्रापि रामचन्द्रस्य नोत्साहोऽभूत् स्त्रिया हतौ ।
ततस्तु धर्मशास्त्रोक्त्या बलाज्जग्राह कौशिकः ॥ १४५ ॥
उचितं नत्र रामेण ताडकाहननं कृतम् ॥
बालिना सह युद्धस्य विषयः क उपस्थितः ॥ १४६ ॥
दुष्टस्य दमनं राजधर्ममासाद्य तत्कृतम् ।

अयानं चाऽथ वार्त्तिं तत् संबोध्य स्फुटमीरितम् ॥ १४७ ॥
सीतानिर्वासनकथा सूक्ष्मदृष्ट्या विचार्यताम् ॥
तत्र लीलोपसंहारो हरिणाऽप्युररीकृतः ॥ १४८ ॥
अतः साकेतयात्रार्थं भूमिका विहिताऽस्ति सा ॥
सीतारामौ सदायुक्तौ वियोगो नैव कर्हिचित् ॥ १४९ ॥
अकीर्त्यप्रियता तत्र लीलया समुदाहृता ।
कृतं प्राधान्यमेकस्या अन्यत् तत्साधकं कृतम् ॥ १५० ॥
भार्गवेण यथा माता भ्रातरश्च हताः स्फुटम् ।
पितुराज्ञैव शिरसा प्राधान्येन समादृता ॥ १५१ ॥
यथा दशरथः सत्यं मानयन् राममत्यजत् ।
रामस्य च वियोगेनात्याक्षीत्प्राणानपि स्वयम् ॥ १५२ ॥
एवं निन्दाग्लानिमेव प्रधानां परिचिन्तयन् ।
दुःखितः स्वनुजान् प्राह सीतां शुद्धां विदन्नपि ॥ १५३ ॥
"अप्यहं जीवितं जह्यां युष्मान् वा पुरुषर्षभाः ।
अपवादभयाद् भीतः किं पुनर्जनकात्मजाम्." ॥ १५४ ॥
अत्यन्तनिन्दासम्बाधे भवेत्सत्यनिगूहनम् ॥
इति सन्दर्शयन् रामो दूयमानो विचारयन् ॥ १५५ ॥
वाल्मीकेराश्रमे पुण्ये तमसातीरसंस्थिते ।
सीतासंस्थापनं युक्तिसम्बद्धं सममंस्त सः ॥ १५६ ॥
यत्कथास्मरणादेव हृदस्माकं विदीर्यति ।

तामप्युरीचकारैष मर्यादापुरुषोत्तमः ॥ १५७ ॥
भवेद् योग्यमयोग्यं वाऽस्माकमाचरणे सदा ।
ईश्वरस्य जगद्भर्तुः सर्वं योग्यमुदीरितम् ॥ १५८ ॥
उपसंहारलीलायां न स्याद्दुःखकनं वरम् ।
सर्वत्राप्युपसंहारो हृदयं परिविध्यति ॥ १५९ ॥

यदि प्रत्यवतिष्ठेत जल्पाकः कोपि जल्पनैः ।
किमु कृष्णो गोपिकानामहार्षीद्वस्त्रसंचयम् ॥ १६० ॥
जलान्निर्गमनार्थं वा हठं किमु चकार ह ।
स उच्यतां नु मीमांसा तृतीया किं न वीक्षिता ॥ १६१ ॥
अनुष्ठानव्रताकृष्टो हरिस्तत्रागतः स्वयम् ।
दृश्यमानोऽनुरागेण प्रियमाणास्तथा करोत् ॥ १६२ ॥
व्रताङ्गभङ्गपूर्तिं चाकारयत् देववन्दनैः ।
पर्यैक्षिष्ट च तत्तेषामनुरागं महोर्जितम् ॥ १६३ ॥
लज्जैवैका कुलस्त्रीणां सम्भवेत् प्रतिबन्धिका ।
समानविषया वृत्तिं प्रतिबध्नाति सा सदा ॥ १६४ ॥
इमाः प्रेमप्रवाहेण स्वात्मानं च विसस्मरुः ।
स्वपरज्ञानसंपोष्यां लज्जां च परिचिच्छिदुः ॥ १६५ ॥
एवं दृष्ट्वा गोपिकास्ता विहितात्मनिवेदनाः ।
प्रौढानुरागाः सरलाः प्रासीददर ईश्वरः ॥ १६६ ॥

दर्शयन् स्वानुरागं हि सर्वानुष्ठानसाधकम्।
"सोऽश्नुते सर्वकामानि" त्यादि प्राबोधयत् स्फुटम् ॥१६७॥

---o---

सोन्माद् कथयेत् कोऽपि परिवव्रुर्हरिं स्त्रियः।
औपपत्यं कथं तेषां हरिणातूररीकृतम् ॥ १६८ ॥
तन्नोच्यते लोकरीतावयोग्यं परिभात्यदः।
परं किं स्यादनुचितं चोचितं च महेशितुः ॥ १६९ ॥
जगत्प्रलयकर्तृत्वं यस्य नानुचितं भवेत्।
तस्य किं मानवी भाषा प्रमाणं योग्यताविधौ ॥ १७० ॥
यद्रोमवातविहृता भ्रमन्त्यणुपरम्पराः।
एतस्य महतः का स्याद् बन्धिकानियमावलिः ॥ १७१ ॥
कस्मिंश्चिच्च तदण्डेषु कृताः कैश्चिन्महर्षिभिः।
नियमा मान्यतां याताः प्रमिता अनुयायिभिः ॥ १७२ ॥
तस्यामेव पृथिव्यां चान्येतदैव विरोधिनः।
विधायान्यादृशान् कांश्चिन्नियमान् विलसन्त्युत ॥ १७३ ॥
स्वस्वाचार्यानुगाः सर्वे विभिन्नमतसंस्थिताः।
तेषु केनाऽथ सूत्रेण बद्धः स्याद् भगवान् हरिः ॥ १७४ ॥
किं च देवो वरदराड् भक्तानुग्रहकारकः।
पुत्रो यथाभूद्देवक्या अभूद् गोपीपतिस्तथा ॥ १७५ ॥
भक्तिकाण्डानुसारेण विहितात्मनिवेदनाः।

पूर्वं कृतानुष्ठानास्ता वव्रिरे चेद्धरिं पतिम् ॥ १७६ ॥
"ये यथा मां प्रपद्यन्ते" प्रतिज्ञामिति योऽकरोत् ।
नाङ्गीकुर्य्यात् कथं सैष देवो भक्ताभिभाषितम् ॥ १७७ ॥
शुद्धानुरागक्रीतोऽसौ दृष्ट्वा बालास्तथाविधाः ।
अनन्यशरणाः प्रेमपरतन्त्रा दृढाः सतीः ॥ १७८ ॥
अङ्गीचकार भगवानुपदेशैरसेविताः ।
भक्तिकाण्डे तदेतस्य कथं वानुचितं भवेत् ॥ १७९ ॥
उपदेशैर्विचलिताः शुद्धप्रेमपराङ्मुखाः ।
कर्मभङ्गविभीतास्तु केवलं दर्शनेच्छवः ॥ १८० ॥
परानुरागरहिता अकृतात्मनिवेदनाः ।
स्त्रियो याज्ञिकविप्राणां कृष्णेन परिवर्तिताः ॥ १८१ ॥
इमा निवेदितात्मानोऽनुरागैकवशंवदाः ।
निवर्तनेऽप्यचलिताः सर्वथा हरिसंश्रयाः ॥ १८२ ॥
संछिन्नाखिलमर्यादापाशदुर्जरबन्धनाः ।
देहगेहस्नेहशून्या मरणे कृतनिश्चयाः ॥ १८३ ॥
निजात्मानो निजपरा निजैकशरणाः प्रियाः ।
अनन्यगतिका गोप्यः कृष्णेनाङ्गीकृताः स्फुटम् ॥ १८४ ॥
भक्तिकाण्डानुसारेण हरिणा तद् वरं कृतम् ।
तासां त्यागेन हननं सर्वथाऽनुचितं भवेत् ॥ १८५ ॥
पुनश्चेत् कथयेत् कोऽपि गोपीभिः सहितो निशि ।

रेमे स भगवांस्तत्तु कथमप्युचितं नहि ॥ १८६ ॥
यतो न शोभते कृष्णे विषयासक्तिरीदृशी।
पापकर्म हरौ पूर्णे नोचितं स्यात् कथंचन ॥ १८७ ॥
स्वभक्तानां च गोपीनां गर्ह्यं गर्ह्यं प्रवर्त्तनम्।
मम वर्त्मानुवर्तन्ते इति येन प्रभाषितम् ॥ १८८ ॥
कथं तेनानुष्ठितं तद् दुष्प्रवृत्तिविधायकम्।
सर्वथा निन्दितं कर्म परदाराभिमर्षणम् ॥ १८९ ॥
चतस्रो युक्तयस्त्वेताः सुगम्भीरादुरुत्तराः।
हरेर्विहारं गोपीभिस्साधयन्ति सुनिन्दितम् ॥ १९० ॥
इति चेच्छ्रूयतां तेन ज्ञातं नानधिकारिणा।
आसां माधुर्यलीलानां तत्त्वं न परिलक्षितम् ॥ १९१ ॥
अत एवेदृशी लीला गोपनीयाः समन्ततः।
दिव्यो नैव रसास्वादो जायतेऽनधिकारिणाम् ॥ १९२ ॥
अत एवानुरागस्य कथापि हृदये न चेत्।
आसां प्रत्युत्तरमपि न भवेद् हृदयङ्गमम् ॥ १९३ ॥
दृश्यतां प्रथमा युक्तिर्विषयासक्तिसूचिका।
परन्तु मिथ्यैवोक्तं तद् यतः सा न हरौ भवेत् ॥ १९४ ॥
हरेर्लीलासु दृश्यन्ते व्यवहारास्तु यादृशाः।
नासक्तयस्तासु तासु सम्भाव्यन्ते परेशितुः ॥ १९५ ॥
अत एव शुकेनापि पञ्चाध्याय्यां पदे पदे।

स्वविम्बविभ्रमो वात्र आत्माराम इतीरितम् ॥ १९६ ॥
न च प्रवृत्तिरेवात्र विषयेच्छा प्रयोजिका।
एवं चेद् दूषणाय स्युः सर्वा एव प्रवृत्तयः ॥ १९७ ॥
क्वचित् कोपः क्वचित्कामः क्वचिल्लोभोऽपि सेत्स्यति।
विशेषो रासलीलायां नैव कोऽपि विलोकितः ॥ १९८ ॥
सर्वं एव यतस्त्वित्तविकारा ब्रह्मदूषणम्।
अतोऽस्ति लीलामात्रं हि विकृतिर्न चितः क्वचित् ॥ १९९ ॥
सृष्टिप्रवृत्तिमत्वाच्च ब्रह्मणः किं न सा भवेत्।
अब्रह्मविषयं तच्चेत् कृष्णमुद्दिश्य नोच्यताम् ॥ २०० ॥
कृष्णः साक्षात् परब्रह्म पूर्णश्च पुरुषोत्तमः।
श्रौतैः प्रमाणैरेतत्तु पूर्णतः प्रतिपादितम् २०१ ॥
युक्त्याभासो द्वितीयोस्ति पापं कृष्ण उदीरितम्।
कृष्णे परब्रह्मरूपे न लेशः पापपुण्ययोः ॥ २०२ ॥
पापसंज्ञा पुण्यसंज्ञा वासनाजन्यकर्मणाम्।
न तस्य वासना काचित् पूर्वमेतदुदीरितम् ॥ २०३ ॥
कर्मणां बन्धहेतूनां ते संज्ञे समुदीरिते।
बन्धस्य सम्भवो नास्ति कृष्णादीनां स्फुटं त्विदम् ॥ २०४ ॥
भवन्ति बन्धरहिता यत्पादाम्बुजसंश्रयाः।
स कथं नु भवेद्बद्धो भगवान् पुरुषोत्तमः ॥ २०५ ॥
श्रीमद्भागवते कृष्णेनोक्तमेकादशे स्फुटम्।

" गुणस्य मायामूलत्वान्न मे मोक्षो न बन्धनम् ॥ २०६ ॥
तेजीयसां च दोषाय नैव कापि क्रिया भवेत्।
तेजोनिधौ कथं सा स्याद्रवेरपि विकाशके ॥ २०७ ॥
युक्तिसंज्ञा तृतीयापि चेत्तु वर्वताकृता।
भक्तानां किं नु गोपीनां कृतं गर्ह्यं प्रयोजनम् ॥ २०८ ॥
तद्स्वप्रेरणा नैव हरिणा विहिता क्वचित्।
किन्तु प्रबोधिता " घोररूपा " इत्यादिभाषणैः ॥ २०९ ॥
किञ्च केनापि भावेन साम्मुख्यं मङ्गलायनम्।
" गोप्यः कामाद् भयात्कंसः " स्पष्टमित्यादिसूदितम् ॥ २१० ॥
" युवां मां पुत्रभावेन ब्रह्मभावेन वाऽसकृत्।
इत्याद्यपि च भावं हि वक्ति सर्वार्थसाधकम् ॥ २११ ॥
न्ययोजिषत नो गोप्यो विचारो वा न निन्दितः।
अत आक्षेपनिक्षेपश्चित्तविक्षेपजो न किम् ॥ २१२ ॥
वस्तुतस्ता न गोपानां कन्याः साधारणस्त्रियः।
श्रुतयो ह्यवतीर्णास्ताः सगुणोपासनेक्षवः ॥ २१३ ॥
बृहद्वामनके सर्वमेतत् स्पष्टमुदीरितम्।
शक्तित्वमपि गोपीनां श्रुतमाथर्वणे स्फुटम् ॥ २१४ ॥
गोप्यो नामेत्युपक्रम्य चन्दनं गोपिचन्दनम्।
इत्यन्तमौपनिषदं वाक्यजातं विलोक्यताम् ॥ २१५ ॥
न वाच्यं श्रुतिशक्तीनां मूर्तिमत्ता कथं भवेत्।

" वेदा यथा मूर्त्तिधरा " इत्युक्ता वेदमूर्त्तिता ॥ २१६ ॥

" कालस्वभावसंस्कारकामकर्मगुणादिभिः।

स्वमद्धिध्वस्तमद्धिभिर्मूर्तिमद्भिरुपासिताः " ॥ २१७ ॥

इत्यादिषु स्पष्टमेव तेषां मूर्त्तिरुदीरिता।

गोप्यो देव्योऽपि चैवोक्ताः "सम्भवन्तु सुरस्त्रियः" ॥२१८॥

न शक्तिश्रुतिदेवीभिर्विहारो दोषकृद् भवेत्।

न वावरद्दराजस्य वरदानं प्रदूष्यते ॥ २१९ ॥

निदर्शनं कृतं मन्दं कथं तुर्यं यदीर्यते।

तत्रोच्यतेऽवताराणां सर्वं न स्यान्निदर्शनम् ॥ २२० ॥

" चोदनालक्षणो धर्म " स्तत्क्रियालक्षणो नहि।

धर्मशास्त्रविरुद्धं चेदैश्वर्य्यं न जनोचितम् ॥ २२१ ॥

" विनश्यत्याचरन् मौढ्याद्यथा रुद्रोऽब्धिजं विषम्।

" तेषां यत् स्ववचोयुक्तं बुद्धिमांस्तत् समाचरेत् ॥ २२२ ॥

ऐश्वर्यं कृष्णलीलायां परिदृष्टं पदे पदे।

तस्मान्न कृष्णलीलाया अन्यार्थं स्यान्निदर्शनम् ॥ २२३ ॥

अन्योऽपि संशयः कोऽपि कस्यापि यदि जायते।

साङ्गोपाङ्गः सोऽपि सर्वैः समालोच्यः समादरात् ॥ २२४ ॥

प्रशस्यन्ते गोपिका या भक्तिग्रन्थेषु सर्वतः।

उच्यन्ते चाधारभूताः परभक्तेश्च भावुकैः ॥ २२५ ॥

अनुरागेण सह चेत् ता दधुः कामवासनाम्।

एतन्न रुचिरं भाति प्रशस्येष्वपि दूषणम्॥ २२६॥
साङ्कर्यं शोभते नैवैकव्यक्तौ ग्राह्यहेययोः।
हेयांशसहितास्ताश्चेत्कथंकारं समादृताः॥ २२७॥
इति चेच्छ्रूयतां तेषां प्रशंसा प्रेममात्रतः।
कामांशो हेय एवाऽस्ति स चेद् भक्तेरसाधकः॥ २२८॥
कामत्वेन तु कामांशो हेय एवाऽस्त्युदाहृतः।
"कामाः स्त्रियो वनचरीरि" त्यादौ व्यज्यते हि तद्॥ २२९॥
कुब्जा प्रकरणे चैव व्यासेन स्पष्टमीरितम्।
काममात्रस्य हेयत्वाद् "दुर्भगेयमयाचत"॥ २३०॥
हेयत्वेऽपि च गोपीनां कामो नासीत् स तादृशः।
भगवद्विषयत्त्वाद्धि कामस्यापि प्रशस्यता॥ २३१॥
न च प्रशस्यतापत्तिः कौब्जे कामेऽपि जायते।
अवच्छेदकभेदोऽस्ति स नासीद् भगवद्धिया॥ २३२॥
"माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः।
स्नेहो भक्तिरितिप्रोक्तस्तया मुक्तिर्न चान्यथा"॥ २३३॥
एवं नारदमार्गेण ज्ञेयं माहात्म्यमादितः।
माहात्म्यज्ञानसम्पत्तिर्गोपीनां स्फुटमीरिता॥ २३४॥
"प्रेष्ठो भवांस्तनुभृतां" "भवान् व्रजजनार्तिहृत्।"
इत्यादिवाक्यजातेन स्पष्टं तत्परिबोध्यते॥ २३५॥
नारदीयेऽप्येकविंशद्धन्नमारभ्यभाषितम्।

स्पष्टं माहात्म्यविज्ञानविस्मृतिर्नेति बोधितम् ॥ २३६ ॥
कामांशोऽपि क्रमेणैवानुरागत्वमुपागतः ।
एवं तासामवस्थे द्वे सकामाकाम संज्ञके ॥ २३७ ॥
गौणकामाः सानुरागाः वंशीं श्रुत्वा समागताः ।
कामप्रसक्तो न हरिः " शुद्धभावप्रसादितः " ॥ २३८ ॥
लक्षीकृत्य स कामांशं वक्रैः प्रत्यबोधयत् ।
दृष्ट्वा च " विक्लवं तासां " प्रहस्याङ्गीचकार ह ॥ २३९ ॥
कामं जिघृक्षुर्भगवांस्तं पूर्वं समवर्द्धयत् ।
अन्तर्धानादिभिस्तं च समूलमुदपाटयत् ॥ २४० ॥
निरुद्योगाभिमानास्ता अरुदन् विकला यदा ।
तदा प्रादुर्भूय देवः शुद्धास्ता अभजत् स्वयम् ॥ २४१ ॥
पूर्वमासन् सकामास्ता अकामाः परतस्तथा ।
पूर्वप्रकरणे प्रोक्तं " स्त्रीणां चैवदुरात्मनाम् " ॥ २४२ ॥
परप्रकरणे चैव स्त्रीरत्नपदबोधिताः ।
वाञ्छन्तंतूद्धवेनाऽपि ह्यासां चरणरेणवः ॥ २४३ ॥
साभूत्कस्मिन् मोहोऽत्र निष्कामा गोपिका मताः ।
अवस्था भेदमज्ञाय शङ्क्यते चेद् वृथैव तद् ॥ २४४ ॥

—— ० ——

पृच्छ्यतेऽन्यैर्यदि ब्रह्मावतारत्वमिहागतम् ।
श्लिष्टं शून्यं खण्डितं वा दूषणाय इयं भवेत् ॥ २४५ ॥

इति चेदुक्तपूर्वं तत्पुनश्चापि निरीक्ष्यताम् ।
सर्वेषां गणितानां न दृश्यन्तेऽत्र विधाः समाः ॥ २४६ ॥
शून्यात् तदंशः सर्वं वा परिनिष्कासितं भवेत् ।
शेषे भेदो नैव दृष्टो वैलक्षण्यमिदं महत् ॥ २४७ ॥
कोटिशोऽपि त्वनन्ताच्चेदूनिताः शिष्यते सदा ।
ज्ञानदीपादिदृष्टान्तोऽप्येवं हि परिकथ्यते ॥ २४८ ॥
पूर्णपूर्णो हरिश्चैवं वेदे निगदितं यथा ।
" पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते " ॥ २४९ ॥

प्रादुर्भूतं ब्रह्म पुनर्व्यवाचाषीत् तथाद्भवत् ।
एवं वेदे क्वापि नास्ति स्वभावः किं स कथ्यते ॥ २५० ॥
इति चेद् दृश्यतां सामवेदे खण्डे तृतीयके ।
स्पष्टं तलवकारोपोनिषत्सु परिकीर्तितम् ॥ २५१ ॥
प्रादुर्भूयाथ किं वीर्यं कोसीत्यादि च पृच्छ्यते ।
वारं वारं ब्रह्मणा तन्नावतारे विलक्षणम् ॥ २५२ ॥

क्रमशो नावतारस्य कथा वेदे विलोकिता ।
एवं चेत् किं शतपथे ब्राह्मणे न विलोकितम् ॥ २५३ ॥
मत्स्यावतार घटना सर्वोक्ता " मनवे ह वै " ।
इत्यारभ्याऽथ किंशिष्टमवतारविचारणे ॥ २५४ ॥

अन्याऽपि जायते शङ्का काचिच्चेदवितर्किता ।
पूर्वं कृता हि मीमांसा स्यात् तस्या अपि बाधिका ॥ २५५ ॥
घृतदुग्धादिकमपि ज्वरिणां ज्वरवर्द्धकम् ।
तथा शङ्कावहं चित्रमवतारनिरूपणम् ॥ २५६ ॥
एषावतारमीमांसा श्रद्धाविश्वासदायिनी ।
कुतर्ककर्त्तनी शङ्कापङ्कसङ्कटशोषिणी ॥ २५७ ॥
सादरं हरिदासानां करयोरर्पिता मया ।
हरिणा हृद्गतेनैव सानुक्रोशं प्रकाशिता ॥ २५८ ॥
हरिर्दिव्यगुणो देवो लीलामानुषविग्रहः ।
प्रीयतामनया कृत्या दीनबन्धुर्दयानिधिः ॥ २५९ ॥
एकोनविंशशतके पञ्चपञ्चाशदुत्तरे ।
वैक्रमेऽब्दे समाप्तेयमवतारविवेचना ॥ २६० ॥
अम्बिकादत्तगौड़ेन हरेश्चरणसेविना ।
कृतावतारमीमांसा स्यात्सदा सुधियां मुदे ॥ २६१ ॥

इत्यवतारमीमांसाकारिका

समाप्ता ॥